# bhIShma stuti

# ભીષ્મસ્તુતી

## Document Information

Text title : bhiishhmastuti

File name : bhiishhmastuti.itx

Category : purana, stotra, vyAsa

Location : doc_purana

Author : Vyasa

Transliterated by : Vijayaraghavan Bashyam <vayasya at yahoo.com>

Proofread by : Vijayaraghavan Bashyam <vayasya at yahoo.com>

Description-comments : Bhishma@s prayer before his last breath.

Source : Bhagavata Purana

Latest update : May 1, 2001

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# ભીષ્મસ્તુતી

(શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં સંહિતાયાં
પ્રથમ સ્કન્ધે યુધિષ્ઠિરરાજ્યપ્રલમ્ભઃ નામ નવમોઽધ્યાયઃ ॥)
શ્રી ભીષ્મ ઉવાચ -
ઇતિ મતિરુપકલ્પિતા વિતૃષ્ણા ભગવતિ સાત્વત પુઙ્ગવે વિભૂમ્નિ ।
સ્વસુખમુપગતે ક્વચિદ્વિહર્તું પ્રકૃતિમુપેયુષિ યદ્ભવપ્રવાહઃ ॥ ૩૨॥

ત્રિભુવનકમનં તમાલવર્ણં રવિકરગૌરવરામ્બરં દધાને ।
વપુરલકકુલાવૃતાનનાબ્જં વિજયસખે રતિરસ્તુ મેઽનવદ્યા ॥ ૩૩॥

યુધિ તુરગરજોવિધૂમ્રવિષ્વક્કચલુલિતશ્રમવાર્યલંકૃતાસ્યે ।
મમ નિશિતશરૈર્વિભિદ્યમાનત્વચિ વિલસત્કવચેઽસ્તુ કૃષ્ણ આત્મા ॥ ૩૪॥

સપદિ સખિવચો નિશમ્ય મધ્યે નિજપરયોર્બલયો રથં નિવેશ્ય ।
સ્થિતવતિ પરસૈનિકાયુરક્ષ્ણા હૃતવતિ પાર્થ સખે રતિર્મમાસ્તુ ॥ ૩૫॥

વ્યવહિત પૃથનામુખં નિરીક્ષ્ય સ્વજનવધાદ્વિમુખસ્ય દોષબુદ્ધ્યા।
કુમતિમહરદાત્મવિદ્યયા યશ્ચરણરતિઃ પરમસ્ય તસ્ય મેઽસ્તુ ॥ ૩૬॥

સ્વનિગમમપહાય મત્પ્રતિજ્ઞા મૃતમધિકર્તુમવપ્લુતો રથસ્થઃ ।
ધૃતરથચરણોઽભ્યયાચ્ચલત્ગુઃ હરિરિવ હન્તુમિભં ગતોત્તરીયઃ ॥ ૩૭॥

શિતવિશિખહતોવિશીર્ણદંશઃ ક્ષતજપરિપ્લુત આતતાયિનો મે ।
પ્રસભમભિસસાર મદ્વધાર્થં સ ભવતુ મે ભગવાન્ ગતિર્મુકુન્દઃ ॥ ૩૮॥

વિજયરથકુટુમ્બ આત્તતોત્રે ધૃતહયરશ્મિનિ તચ્છ્રિયેક્ષણીયે।
ભગવતિ રતિરસ્તુ મે મુમૂર્ષોઃ યમિહ નિરીક્ષ્ય હતાઃ ગતાઃ સરૂપમ્ ॥ ૩૯॥

લલિત ગતિ વિલાસ વલ્ગુહાસ પ્રણય નિરીક્ષણ કલ્પિતોરુમાનાઃ ।
કૃતમનુકૃતવત્ય ઉન્મદાન્ધાઃ પ્રકૃતિમગન્ કિલ યસ્ય ગોપવધ્વઃ ॥ ૪૦॥

મુનિગણનૃપવર્યસંકુલેઽન્તઃ સદસિ યુધિષ્ઠિરરાજસૂય એષામ્ ।

અર્હણમુપપેદ ઈક્ષણીયો મમ દૃશિ ગોચર એષ આવિરાત્મા ॥ ૪૧॥

તમિમમહમજં શરીરભાજાં હૃદિહૃદિ
ધિષ્ટિતમાત્મકલ્પિતાનામ્ ।
પ્રતિદૃશમિવ નૈકધાઽર્કમેકં સમધિગતોઽસ્મિ વિધૂતભેદમોહઃ ॥ ૪૨॥

શ્રી સૂત ઉવાચ -
કૃષ્ણ એવં ભગવતિ મનોવાગ્દૃષ્ટિવૃત્તિભિઃ ।
આત્મન્યાત્માનમાવેશ્ય સોઽન્તઃ શ્વાસમુપારમત્ ॥ ૪૩॥

॥ ઇતિ॥

---

Encoded by Vijayaraghavan Bashyam vayasya at yahoo.com

---

*bhIShma stuti*

pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*